२९. होता यक्षदिडेडितऽ आजुहव्वानः सरस्वतीमिन्द्रम्बलेन व्वर्द्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय भेषजँय्यवैः कर्क्कन्धुभिर्म्मधु लाजैर्न्न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्व्यन्त्वाज्ज्यस्य होतर्य्यज॥[६]

---

१. वा.सं.२०.३८
२. वा.सं.२०.५८
३. वा.सं.२७.१४
४. वा.सं.२९.२८
५. वा.सं.२८.३
६. वा.सं.२१.३२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३०. होता यक्षद्दीडेन्यमीडितँ व्वृत्रहन्तममिडाभिरीड्यꣳ सहꣳ सोममिन्द्रँ व्वयोधसम्॥ अनुष्टुभञ्छन्दऽ इन्द्रियम्पञ्चाविङ्गाँ व्वयो दधद्वेत्त्वाज्ज्यस्य होतर्व्वज॥[१]

३१. देवीऽ उषासानक्तेन्द्रँव्व्यज्ञेप्प्रयत्त्यहव्वेताम्॥ दैवीर्व्विशꣳ प्प्रायासिष्टाꣳ सुप्प्रीते सुधिते व्वसुवने व्वसुधेयस्य व्वीताँव्व्यज॥[२]

३२. देवीऽ उषासावश्विना सुत्रामेन्द्रे सरस्वती॥ बलन्न व्वाचमास्यऽ उषाब्भ्यान्दधुरिन्द्रियँ व्वसुवने व्वसुधेयस्य व्व्यन्तु यज॥[३]

३३. देवीऽ उषासानक्ता देवमिन्द्रँ व्वयोधसन्देवी देवमवर्द्धताम्॥ अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वीताँव्व्यज॥[४]

३४. सुबर्हिरग्निः पूषण्वान्त्स्तीर्ण्णबर्हिरमर्त्त्यꣳ॥ बृहतीच्छन्दऽ इन्द्रियन्त्रिवत्त्सो गौर्व्वयो दधुꣳ॥[५]

३५. जुषाणो बर्हिर्हरिवान्नऽ इन्द्रः प्प्राचीनꣳ सीदत्त्प्रदिशा पृथिव्याः॥ उरुप्प्रथाꣳ प्रथमानꣳ स्योनमादित्त्यैरक्तँ व्वसुभिꣳ सजोषाꣳ॥[६]

---

१. वा.सं.२८.२६
२. वा.सं.२८.१४
३. वा.सं.२१.५०
४. वा.सं.२८.३७
५. वा.सं.२१.१५
६. वा.सं.२०.३९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३६. अश्विना नमुचेः सुतꣳ सोमꣳ शुक्रम्परिस्रुता॥ सरस्वती तमाभरद्बर्हिषेन्द्राय पातवे॥[१]

३७. स यक्षदस्य महिमानमग्ने? सऽ ईम्मन्द्रा सुप्रयसः। वसुश्चेतिष्ठो वसुधातमश्च॥[२]

३८. प्राचीनम्बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते ऽ अग्रे ऽ अह्नाम्॥ व्युप्रथते वितरँ वरीयो देवेभ्यो ऽ अदितये स्योनम् ॥[३]

३९. होता यक्षद्बर्हिषीन्द्रन्निषद्वरँ वृषभन्नर्व्वापसम्॥ वसुभी रुद्रैरादित्यैः सयुग्भिर्ब्बर्हिरासदद्वेत्त्वाज्ज्यस्य होतर्व्वज॥[४]

४०. होता यक्षद्बर्हिरुर्ण्णम्मदा भिषङ्ङ्नासत्त्याभिषजाश्विनाश्वा शिशुमती भिषग्धेनुः सरस्वती भिषग्दुहऽ इन्द्राय भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्व्वज॥[५]

४१. होता यक्षत्सुबर्हिषम्पूषण्वन्तमर्म्मर्त्यꣳ सीदन्तम्बर्हिषिप्रियेमृतेन्द्रँ वयोधसम्॥ बृहतीञ्छन्दऽ इन्द्रियन्त्रिवत्सङ्गँ वयो दधद्वेत्त्वाज्ज्यस्य होतर्व्वज॥[६]

---

१. वा.सं.२०.५९
२. वा.सं.२७.१५
३. वा.सं.२९.२९
४. वा.सं.२८.४
५. वा.सं.२१.३३
६. वा.सं.२८.२७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४२. दे॒वी जोष्ट्री॒ व्वसु॑धिती दे॒वमिन्द्र॑मवर्द्धताम्॥ अया॑व्य॒न्या-घाद्द्वेषा॒ꣳस्यान्या व्व॑क्ष॒द्द्वसु॒ व्वार्य्या॑णि॒ यज॑मानाय शिक्षि॒ते व्वसु॒वने॑ व्वसु॒धेय॑स्य व्वीता॒ँव्यज॑॥[१]

४३. दे॒वी जोष्ट्री॒ सर॑स्वत्त्य॒श्विनेन्द्र॑मवर्द्धयन्॥ श्रोत्र॒न्न कर्ण्ण॑यो॒र्व्यशो॒ जोष्ट्री॑भ्यान्दधुरिन्द्रि॒यँ व्वसु॒वने॑ व्वसु॒धेय॑स्य व्यन्तु॒ यज॑॥[२]

४४. दे॒वी जोष्ट्री॒ व्वसु॑धिती दे॒वमिन्द्रँ॒ व्वयो॒धस॑न्दे॒वी दे॒वम॑वर्द्धताम्॥ बृ॒ह॒त्त्याच्छन्द॑सेन्द्रि॒यꣳ श्रोत्र॒मिन्द्रे॒ व्वयो॒ दध॑द्द्वसु॒वने॑ व्वसु॒धेय॑स्य व्वीता॒ँव्यज॑॥[३]

४५. दुरो॑ दे॒वीर्द्दिशो॑ म॒हीर्ब्र॑ह्म्मा दे॒वो बृ॒हस्प्प॑तिः॑॥ प॒ङ्क्तिश्च्छन्द॑ऽ इ॒हेन्द्रि॒यन्तु॑र्व्व॑वाड्ड्गौर्व्व॑यो॑ दधुः॑॥[४]

४६. इन्द्र॒न्दुरः॑ कव॒ष्य्यो॒ धाव॑माना॒ व्वृषा॑णँव्यन्तु॒ जन॑यः॑ सु॒पत्नी॑ः॑॥ द्वारो॑ दे॒वीर॒भितो॒ व्विश्श्र॑यन्ताꣳ सु॒वीरा॑ व्वी॒रम्प्रथ॑माना॒ महो॑भिः॑॥[५]

४७. क॒व॒ष्य्यो॒ न व्यच॑स्वतीर॒श्विवभ्या॒न्न दुरो॒ दिशः॑॥ इन्द्रो॒ न रोद॑सीऽ उ॒भे दु॒हे काम॒न्त्सर॑स्वती॥[६]

---

१. वा.सं.२८.१५
२. वा.सं.२१.५१
३. वा.सं.२८.३८
४. वा.सं.२१.१६
५. वा.सं. २०.४०
६. वा.सं.२०.६०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४८. द्वारो देवीरन्वस्य विश्वैर्व्रता ददन्तेऽअग्नेः॥ उरुव्यचसो धाम्ना पत्यमानाः॥[१]

४९. व्यचस्वतीरुर्विया विश्वश्रयन्ताम्पतिभ्यो न जनयः शुम्भमानाः॥ देवीर्द्वारो बृहतीर्विश्वमिन्वा देवेभ्यो भवत सुप्रायणाः॥[२]

५०. होता यक्षदोजो न वीर्य्यꣳ सहोद्द्वारऽ इन्द्रमवर्द्धयन्॥ सुप्रायणाऽ अस्मिन्नयज्ञे विश्वश्रयन्तामृतावृधोद्द्वारऽ इन्द्राय मीदुषे व्यन्त्वाज्यस्य होतर्य्यज॥[३]

५१. होता यक्षद्दुरो दिशः कवष्यो न व्यचस्वतीरश्विवभ्यान्न दुरो दिशऽ इन्द्रो न रोदसी दुघे दुहे धेनुः सरस्वत्यश्विनेन्द्राय भेषजꣳ शुक्रन्नज्ज्योतिरिन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्य्यज॥[४]

५२. होता यक्षद्व्यचस्वतीः सुप्रायणाऽ ऋतावृधोद्द्वारो देवीर्हिरण्ययीर्ब्रह्माणमिन्द्रँ व्वयोधसम्॥ पङ्क्तिञ्छन्दऽ इहेन्द्रियन्तुर्य्यवाहङ्गाँ व्वयो दधद्व्यन्त्वाज्यस्य होतर्य्यज॥[५]

५३. देवीऽ ऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रमवर्द्धताम्॥ इषमूर्ज्जमन्या व्वक्षत्सग्धिꣳ सपीतिमन्या नवेन पूर्व्वन्दयमाने पुराणेन

---

१. वा.सं.२७.१६
२. वा.सं.२९.३०
३. वा.सं.२८.५
४. वा.सं.२१.३४
५. वा.सं.२८.२८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नवमधातामूर्ज्जमूर्ज्जाहुतीऽ ऊर्ज्जयमाने व्वसु व्वार्व्वाणि यजमानाय शिक्षिते व्वसुवने व्वसुधेयस्य व्वीताँव्यज॥[१]

५४. देवीऽ ऊर्ज्जाहुती दुघे सुदुघेन्द्रे सरस्वत्यश्विना भिषजावतः॥ शुक्रन्नज्ज्योतिस्तनयोराहुती धत्तऽ इन्द्रियँ व्वसुवने व्वसुधेयस्य व्यन्तु यज॥[२]

५५. देवीऽ ऊर्ज्जाहुती दुघे सुदुघे पयसेन्द्रँ व्वयोधसन्देवी देवमवर्द्धताम्॥ पङ्क्त्याच्छन्दसेन्द्रियः शुक्रमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वीताँव्यज॥[३]

५६. उषे यह्वी सुपेशसा व्विश्वे देवाऽ अमर्त्याः ॥ त्रिष्टुप्छन्दऽ इहेन्द्रिहम्पष्ठवाड्गौर्व्वयो दधुः॥[४]

५७. उषासानक्ता बृहती बृहन्तम्पयस्वती सुदुघे शूरमिन्द्रम् ॥ तन्तुन्ततम्पेशसा सँव्वयन्ती देवानान्देवँव्यजतः सुरुक्मे॥[५]

५८. उषासा नक्तमश्विना दिवेन्द्रः सायमिन्द्रियैः॥ सञ्जानाने सुपेशसा समञ्जाते सरस्वत्या॥[६]

---

१. वा.सं.२८.१६
२. वा.सं.२१.५२
३. वा.सं.२८.३९
४. वा.सं.२१.१७
५. वा.सं.२०.४१
६. वा.सं.२०.६१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५९. तेऽ अंस्य् योषणे दिव्व्ये न योनाऽ उषासानक्ता॥
इमँय्यज्ञमंवतामद्ध्वरन्नः॥[१]

६०. आ सुष्व्वयन्ती यजतेऽ उपाकेऽ उषासानक्ता सदतान्नि योनौ॥
दिव्व्ये योषणे बृहती सुरुक्क्मेऽ अधिश्श्रियंꣳ शुक्क्रपिशन्दधाने॥[२]

६१. होता यक्क्षदुषेऽ इन्द्रस्य धेनू सुदुघे मातरा मही॥ सवातरौ न तेजसा
व्वत्तसमिन्द्रंमवर्द्धताँ व्वीतामाज्ज्यस्य होतर्य्यज॥[३]

६२. होता यक्क्षत्त्सुपेशंसो नक्क्तन्दिवाश्श्विना समंञ्जाते
सरंस्वत्त्यात्त्विषिमिन्द्रे न भेंषजꣳ श्येनो न रजंसा हृदाश्श्रिया न
मासंरम्पयः सोमः परिस्रुता घृतम्मधु व्व्यन्त्वाज्ज्यस्य होतर्य्यज॥[४]

६३. होता यक्क्षत्त्सुपेशंसा सुशिल्प्ये बृहतीऽ उभे नक्क्तोषासा न दंर्शते
व्विश्श्वमिन्द्रँ व्वयोधसम्॥ त्रिष्टुभञ्छन्दऽ इहेन्द्रियम्पंष्ठुवाहङ्गाँ व्वयो
दधद्द्वीतामाज्ज्यस्य होतर्य्यज॥[५]

६४. देवा दैव्व्या होतारा देवमिन्द्रमवर्द्धताम् ॥ हताघशꣳसावाभांष्टाँ
व्वसु व्वार्य्याणि यजमानाय शिक्क्षतौ व्वसुवनें व्वसुधेयस्य
व्वीताँय्यज॥[६]

---

१. वा.सं.२७.१७
२. वा.सं.२९.३१
३. वा.सं.२८.६
४. वा.सं.२१.३५
५. वा.सं.२८.२९
६. वा.सं.२८.१७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६५. देवा देवानाम्भिषजा होतारा विन्द्रमश्विना॥ व्वषट्ट्कारैः सरस्वतीत्त्विषिन्न हृदये मतिꣳ होतृभ्यान्दधुरिन्द्रियँ व्वसुवनें व्वसुधेयस्य व्यन्तु व्वजं॥[१]

६६. देवा दैव्व्या होतारा देवमिन्द्रँ व्वयोधसन्देवौ देवमवर्द्धताम् । त्रिष्टुभाच्छन्दसेन्द्रियन्त्विषिमिन्द्रे व्वयो दधद्द्रसुवनें व्वसुधेयस्य व्वीताँव्वजं॥[२]

६७. दैव्व्या होतारा भिषजेन्द्रेंण सयुजा युजा॥ जगतीच्छन्दऽ इन्द्रियमनड्वान्नौर्व्वयो दधुः॥[३]

६८. दैव्व्या मिमाना मनुषः पुरुत्रा होतारा विन्द्रम्प्रथमा सुवाचा॥ मूर्द्धन्यज्ञस्य मधुना दधानाप्राचीनञ्ज्योतिर्हविषा व्वृधातः॥[४]

६९. पातन्नोऽ अश्विना दिवा पाहि नक्तꣳ सरस्वति॥ दैव्व्या होतारा भिषजा पातमिन्द्रꣳ सचा सुते॥[५]

७०. दैव्व्या होताराऽ ऊद्ध्वमद्ध्वरन्नोग्नेर्ज्जिह्वामभि गृणीतम्॥ कृणुतन्नः स्विष्टिम्॥[६]

---

१. वा.सं.२१.५३
२. वा.सं.२८.४०
३. वा.सं.२१.१८
४. वा.सं.२०.४२
५. वा.सं.२०.६२
६. वा.सं.२७.१८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७१. दैव्या होताराप्प्रथमा सुवाचा मिमाना यज्ञम्मनुषो यजद्ध्यै॥
प्रचोदयन्ता व्विदथेषु कारूप्प्राचीनञ्ज्योतिःप्प्रदिशा दिशन्ता॥[१]

७२. होता यक्षद्दैव्या होतारा भिषजा सखाया हविषेन्द्रम्भिषज्ज्यतः॥
कवी देवौप्प्रचेतसाविन्द्राय धत्तऽ इन्द्रियँ व्वीतामाज्ज्यस्य होतर्व्वज॥[२]

७३. होता यक्षद्दैव्या होतारा भिषजाश्विनेन्द्रन्न जागृवि दिवा नक्तन्न भेषजैः शूषः सरस्वती भिषक्क्सीसेन दुहऽ इन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्व्वज॥[३]

७४. होता यक्षत्प्रचेतसा देवानामुत्तमँव्व्यशो होतारा दैव्या कवी सयुजेन्द्रँ व्वयोधसम्॥ जगतीञ्छन्दऽ इन्द्रियमनड्वाहङ्गाँ व्वयो दधद्व्वीतामाज्ज्यस्य होतर्व्वज॥[४]

७५. देवीस्तिस्त्रस्तिस्रो देवीः पतिमिन्द्रमवर्द्धयन्। अस्पृक्षद्द्वारती दिवः रुद्रैर्व्वज्ञः सरस्वतीडा व्वसुमती गृहान्व्वसुवने व्वसुधेयस्य व्यन्तु यज॥[५]

७६. देवीस्तिस्त्रस्तिस्रो देवीरश्विनेडा सरस्वती॥ शूषन्न मद्ध्ये नाभ्यामिन्द्राय दधुरिन्द्रियँ व्वसुवने व्वसुधेयस्य व्यन्तु यज॥[६]

---

१. वा.सं.२९.३२
२. वा.सं.२८.७
३. वा.सं.२१.३६
४. वा.सं.२८.३०
५. वा.सं.२८.१८
६. वा.सं.२१.५४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७७. दे॒वीस्ति॒स्त्रस्ति॒स्त्रो दे॒वीर्व्वा॑योधस॒म्पति॒मिन्द्र॑वर्द्धयन् ॥ जग॑त्त्या॒च्छन्द॑सेन्द्रि॒यꣳ शूष॒मिन्द्रे॒ व्वयो॒ दधद्द्वसु॒वने॑ व्वसु॒धेय॑स्य व्व्यन्तु॒ यज॑॥[१]

७८. ति॒स्रऽ इडा॒ सर॑स्वती॒ भार॑ती म॒रुतो॒ व्विशः॑॥ व्वि॒राट्छ्छन्द॑ऽ इ॒हेन्द्रि॒यन्धे॒नुग्गौन्न व्वयो॑ दधुः॑॥[२]

७९. ति॒स्रो दे॒वीर्ह॒विषा॒ व्वर्द्ध॑मानाऽ इन्द्र॑ञ्जुषा॒णा जन॑यो॒ न पत्नीः॑। अच्छि॑न्नन्तन्तु॒म्पय॑सा॒ सर॑स्व॒तीडा॑ दे॒वी भार॑ती व्वि॒श्श्वतू॑र्त्तिः॑॥[३]

८०. ति॒स्रस्त्रे॒धा सर॑स्वत्त्य॒श्श्विना॒ भार॒तीडा॑॥ ती॒व्रम्प॑रि॒स्रुता॒ सोम॒मिन्द्रा॑य सुषुवु॒र्म्मद॑म्॥[४]

८१. ति॒स्रो दे॒वीर्ब्ब॒र्हिरदꣳ स॑द॒न्त्विडा॒ सर॑स्वती॒ भार॑ती॥ म॒ही गृ॑णा॒ना॥[५]

८२. आ नो॑ य॒ज्ञम्भार॑ती॒ तूय॑मेत्त्विडा॑ मनु॒ष्व्वदि॒ह चे॒तय॑न्ती॥ ति॒स्रो दे॒वीर्ब्ब॒र्हिरदꣳ स्यो॒नꣳ सर॑स्वती॒ स्वप॑सः॑ सदन्तु॒॥[६]

८३. होता॑ यक्षत्ति॒स्रो दे॒वीर्न्न भे॑ष॒जन्त्रय॑स्त्रि॒धात॑वो॒पसऽ इडा॒ सर॑स्वती॒ भार॑ती म॒ही॑॥ इन्द्र॑पत्नीर्ह॒विष्म॑ती॒र्व्व॑न्त्वाज्ज्य॑स्य॒ होत॒र्य्यज॑॥[७]

---

१. वा.सं.२८.४१
२. वा.सं.२१.१९
३. वा.सं.२०.४३
४. वा.सं.२०.६३
५. वा.सं.२७.१९
६. वा.सं.२९.३३
७. वा.सं.२८.८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८४. होता यक्षत्तिस्रो देवीर्न्न भेषजन्त्रयस्त्रिधातवोपसो रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा सरस्वती महऽ इन्द्राय दुहऽइन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्व्यजं॥[१]

८५. होता यक्षत्पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारतीर्बृहतीर्म्महीः पतिमिन्द्रं व्वयोधसम् ॥ विराजच्छन्दऽ इहेन्द्रियन्धेनुङ्गान्न व्वयो दधद्व्यन्त्वाज्ज्यस्य होतर्व्यजं॥[२]

८६. देवऽइन्द्रो नराशꣳसस्त्रिवरूथस्त्रिबन्धुरो देवमिन्द्रमवर्द्धयत्। शतेन शितिपृष्ठानामाहितः सहस्रेणप्र वर्त्तते मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाद्ध्वर्य्यवं व्वसुवने व्वसुधेयस्य व्वेतु यजं॥[३]

८७. देवऽ इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विवभ्यामीयते रथः॥ रेतो न रूपममृतञ्जनित्रमिन्द्रायत्त्वष्टा दधदिन्द्रियाणि व्वसुवने व्वसुधेय व्यन्तु यजं॥[४]

८८. देवो नराशꣳसो देवमिन्द्रं व्वयोधसन्देवो देवमवर्द्धयत् ॥ विराजाच्छन्दसेन्द्रियꣳ रूपमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वेतु यजं॥[५]

---

१. वा.सं.२१.३७
२. वा.सं.२८.३१
३. वा.सं.२८.१९
४. वा.सं.२१.५५
५. वा.सं.२८.४२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८९. त्वष्टा तुरीपोऽ अद्भुतऽ इन्द्राग्नी पुष्टिवर्द्धना॥ द्विपदाच्छन्दऽ इन्द्रियमुक्षा गौर्न्न व्वयो दधुः॥[१]

९०. त्वष्टा दधच्छुष्ममिन्द्राय व्वृष्णेपाकोचिष्टुर्व्वशसे पुरूणि॥ व्वृषा यजन्व्वृषणम्भूरिरेता मूर्द्धन्न्यज्ञस्य समनक्तु देवान्॥[२]

९१. अश्विना भेषजम्मधु भेषजन्नः सरस्वती॥ इन्द्रेत्त्वष्टा यशः श्रियः रूपः रूपमधुः सुते॥[३]

९२. तन्नस्तुरीपमद्भुतम्पुरुक्षुत्त्वष्टा सुवीर्य्यम्॥ रायस्पोषँ व्विष्यतु नाभिमस्मे॥[४]

९३. यऽ इमेद्यावापृथिवी जनित्री रूपैरपिंशद्भुवनानि व्विश्वा॥ तमद्य होतरिषितो यजीयान्देवन्त्वष्टारमिह यक्षि व्विद्वान्॥[५]

९४. होता यक्षत्त्वष्टारमिन्द्रन्देवम्भिषजः सुयजङ्घृतश्रियम्॥ पुरुरूपः सुरेतसम्घोनमिन्द्रायत्त्वष्टा दधदिन्द्रियाणि व्वेत्त्वाज्ज्यस्य होतर्व्वज॥[६]

९५. होता यक्षत्सुरेतसमृषभन्नर्व्वापसन्त्वष्टारमिन्द्रमश्विना भिषजन्न सरस्वतीमोजो न जूतिरिन्द्रियँ व्वृको न रभसो भिषग्यशः सुरया

---

१. वा.सं.२१.२०
२. वा.सं.२०.४४
३. वा.सं.२०.६४
४. वा.सं.२७.२०
५. वा.सं.२९.३४
६. वा.सं.२८.९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भेषजꣳ श्रिया न मासरम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्व्वज॥[१]

९६. होता यक्षत्त्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳ रूपाणि बिब्भ्रतम्पृथक्क्पुष्टिमिन्द्रँ व्वयोधसम्॥ द्विपदञ्छन्दऽ इन्द्रियमुक्षाणङ्गन्न व्वयो दधद्वेत्त्वाज्ज्यस्य होतर्व्वज॥[२]

९७. देवो देवैर्व्वनस्पतिर्हिरण्ययपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्द्धयत्॥ दिवमग्रेणास्पृक्क्षदान्तरिक्षम्पृथिवीमदृꣳहीद्द्वसुवने व्वसुधेयस्य व्वेतु यज॥[३]

९८. देवो देवैर्व्वनस्पतिर्हिरण्ययपर्णोऽ अश्विवभ्याꣳ सरस्वत्या सुपिप्पलऽ इन्द्राय पच्च्यते मधु॥ ओजो न जूतिर्ऋषभो न भामँ व्वनस्पतिर्न्नो दधदिन्द्रियाणि व्वसुवने व्वसुधेयस्य व्यन्तु यज॥[४]

९९. देवो व्वनस्पतिर्द्देवमिन्द्रँ व्वयोधसन्देवो देवमवर्द्धयत्॥ द्विपदाच्छन्दसेन्द्रियम्भगमिन्द्रे व्वयो दधद्द्वसुवने व्वसुधेयस्य व्वेतु यज॥[५]

१००. शमिता नो व्वनस्पतिः सविताप्रसुवन्नभगम्॥ ककुप्छन्दऽ इहेन्द्रियँ व्वशा व्वेहद्द्वयो दधुः॥[६]

---

१. वा.सं.२१.३८
२. वा.सं.२८.३२
३. वा.सं.२८.२०
४. वा.सं.२१.५६
५. वा.सं.२८.४३
६. वा.सं.२१.२१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०१. व्वनस्पतिरवसृष्टो न पाशैस्त्मन्या समञ्जञ्छमिता न देवः॥ इन्द्रस्य हव्यैर्ज्जठरम्पृणानः स्वदाति यज्ञम्मधुना घृतेन॥[१]

१०२. ऋतुथेन्द्रो व्वनस्पतिः शशमानः परिस्रुता॥ कीलालमश्विवब्भ्याम्मधु दुहे धेनुः सरस्वती॥[२]

१०३. व्वनस्पतेव सृजा ररणस्त्मना देवेषु॥ अग्निर्हव्यः शमिता सूदयाति॥[३]

१०४. उपावसृजत्मन्या समञ्जन्देवानाम्पाथऽ ऋतुथा हवीꣳषि॥ व्वनस्पतिः शमिता देवोऽ अग्निः स्वदन्तु हव्यम्मधुना घृतेन॥[४]

१०५. होता यक्षद्व्वनस्पतिः शमितारः शतक्रतुन्धियो जोष्टारमिन्द्रियम् ॥ मद्ध्वा समञ्जन्पथिभिः सुगेभिः स्वदाति यज्ञम्मधुना घृतेन व्वेत्त्वाज्ज्यस्य होतर्व्वज॥[५]

१०६. होता यक्षद्व्वनस्पतिः शमितारः शतक्रतुम्भीमन्न मन्युः राजानँ व्याघ्रन्नमसाश्विना भामः सरस्वती भिषगिन्द्राय दुहऽ इन्द्रियम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्व्वज॥[६]

१०७. होता यक्षद्व्वनस्पतिः शमितारः शतक्रतुः हिरण्यपर्णमुक्विथनः रशनाम्बिब्भ्रतँ व्वशिम्भगमिन्द्रँ

---

१. वा.सं.२०.४५
२. वा.सं.२०.६५
३. वा.सं.२७.२१
४. वा.सं.२९.३५
५. वा.सं.२८.१०
६. वा.सं.२१.३९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्वयोधसम्॥ ककुभञ्छन्दऽ इहेन्द्रियँ व्वशाँ व्वेहतङ्गाँ व्वयो दधद्वेत्त्वाज्ज्यस्य होतर्व्वज॥[१]

१०८. देवम्बर्हिर्व्वारितीनान्देवमिन्द्रमवर्द्धयत्॥ स्वासस्थमिन्द्रेणासन्नमन्या बर्हीꣳष्यब्भ्यभूदद्वसुवनें व्वसुधेयस्य व्वेतु यज॥[२]

१०९. देवम्बर्हिर्व्वारितीनामदध्वरेस्तीर्ण्णमश्विवब्भ्यामूर्ण्णम्मदाः सरस्वत्या स्योनमिन्द्र ते सदः॥ ईशायै मन्युः राजानम्बर्हिषा दधुरिन्द्रियँ व्वसुवनें व्वसुधेयस्य व्व्यन्तु यज॥[३]

११०. देवम्बर्हिर्व्वारितीनान्देवमिन्द्रँ व्वयोधसन्देवन्देवमवर्द्धयत्॥ ककुभाच्छन्दसेन्द्रियँ व्वशऽ इन्द्रे व्वयो दधद्वसुवनें व्वसुधेयस्य व्वेतु यज॥[४]

१११. स्वाहा यज्ञँ व्वरुणः सुक्षत्रो भेषजङ्करत्॥ अतिच्छन्दाऽ इन्द्रियम्बृहदृषभो गौर्व्वयो दधुः॥[५]

११२. स्तोकानामिन्दुम्प्रति शूरऽ इन्द्रो व्वृषायमाणो व्वृषभस्तुराषाट्॥ घृतप्पुषा मनसा मोदमानाः स्वाहा देवाऽ अमृता मादयन्ताम्॥[६]

---

१. वा.सं.२८.३३
२. वा.सं.२८.२१
३. वा.सं.२१.५७
४. वा.सं.२८.४४
५. वा.सं.२१.२२
६. वा.सं.२०.४६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११३. गोभिर्न्न सोममश्विना मासरिण परिस्रुता॥ समधातꣳ सरस्वत्या स्वाहेन्द्रे सुतम्मधु॥[१]

११४. अग्ने स्वाहा कृणुहि जातवेदऽ इन्द्राय हव्यम् ॥ विश्वेदेवा हविरिदञ्जुषन्ताम्॥[२]

११५. सद्द्यो जातो व्यमिमीत यज्ञमग्निदर्देवानामभवत्पुरोगाः। अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतꣳ हविरदन्तु देवाः॥[३]

११६. होता यक्षदिन्द्रꣳ स्वाहाज्ज्यस्य स्वाहा मेदसः स्वाहा स्तोकानाꣳ स्वाहा स्वाहाकृतीनाꣳ स्वाहा हव्यसूक्तीनाम्॥ स्वाहा देवाऽ आज्ज्यपा जुषाणाऽ इन्द्रऽ आज्ज्यस्य व्यन्तु होतर्व्वज॥[४]

११७. होता यक्षदग्निꣳ स्वाहाज्ज्यस्य स्तोकानाꣳ स्वाहा मेदसाम्पृथक्स्वाहाच्छागमश्विवब्भ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहऽ ऋषभमिन्द्राय सिꣳहाय सहसऽइन्द्रियꣳ स्वाहाग्निन्न भेषजꣳ स्वाहा सोममिन्द्रियꣳ स्वाहेन्द्रꣳ सुत्रामाणꣳ सवितारँ व्वरुणम्भिषजाम्पतिꣳ स्वाहा व्वनस्पतिम्प्रियम्पाथो न भेषजꣳ स्वाहा देवाऽ आज्ज्यपा जुषाणोऽ अग्निवब्भेषजम्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्ज्यस्य होतर्व्वज॥[५]

---

१. वा.सं.२०.६६
२. वा.सं.२७.२२
३. वा.सं.२९.३६
४. वा.सं.२८.११
५. वा.सं.२१.४०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११८. होता यक्षत्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्वरुणम्भेषजङ्गविङ्क्षत्रमिन्द्रँ व्वयोधसम् ॥ अतिच्छन्दसञ्छन्दऽ इन्द्रियम्बृहदृषभङ्गाँ व्वयो दधद्व्यन्त्वाज्ज्यस्य होतर्व्वजं॥[1]

११९. देवोऽ अग्निः स्विष्टकृद् देवमिन्द्रमवर्द्धयत् ॥ स्विष्टकृङ्कुर्व्वन्त्स्विष्टकृत्स्विष्टमद्य करोतु नो व्वसुवने व्वसुधेयस्य व्वेतु यजं॥[2]

१२०. देवोऽ अग्निः स्विष्टकृद् देवान्यक्षद्द्याथायथः होतारविन्द्रमश्विना व्वाचा व्वाचः सरस्वतीमग्निः सोमꣳ स्विष्टकृत्स्विष्टऽ इन्द्रः सुत्रामा सविता व्वरुणो भिषगिष्टो देवो व्वनस्पतिः स्विष्टा देवाऽ आज्ज्यपाः स्विष्टोऽ अग्निरग्निना होता होत्रे स्विष्टकृद्द्यशो न दधदिन्द्रियमूर्ज्जमपचितिꣳ स्वधाँ व्वसुवने व्वसुधेयस्य व्यन्तु यजं॥[3]

१२१. देवोऽ अग्निः स्विष्टकृद्देवमिन्द्रँ व्वयोधसन्देवो देवमवर्द्धयत्॥ अतिच्छन्दसाच्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे व्वयो दधद्वसुवने व्वसुधेयस्य व्वेतु यजं॥[4]

१२२. अग्निमद्य होतारमवृणीतायँयजमानः पचन्पक्तीः पचन्पुरोडाशम्बद्ध्नन्निन्द्रायच्छागम्॥[5]

---

१. वा.सं.२८.३४
२. वा.सं.२८.२२
३. वा.सं.२१.५८
४. वा.सं.२८.४५
५. वा.सं.२८.२३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१२३. अग्निमद्द्य होतारमवृणीतायँय्यजमानꣳ पचन्पक्तीꣳ पचन्पुरोडाशान्बद्ध्नन्नश्विवब्भ्याञ्छागꣳ सरस्वत्यै मेषमिन्द्रायऽ ऋषभꣳ सुन्वन्नश्विवब्भ्याꣳ सरस्वत्याऽ इन्द्राय सुत्राम्णे सुरासोमान्॥[१]

१२४. अग्निमद्द्य होतारमवृणीतायँय्यजमानꣳ पचन्पक्तीꣳ पचन्पुरोडाशम्बद्धन्निन्द्राय व्वयोधसेच्छागम्॥[२]

१२५. सूपस्थाऽ अद्द्य देवो व्वनस्पतिरभवदिन्द्रायच्छागेन॥[३]

१२६. सूपस्थाऽ अद्द्य देवो व्वनस्पतिरभवदश्विवब्भ्याञ्छागेन सरस्वत्यै मेषेणेन्द्रायऽ ऋषभेणाक्षँस्तान्मेदस्तः प्रति पचतागृभीषतावीवृधन्त पुरोडाशैरपुरश्विना सरस्वतीन्द्रः सुत्रामा सुरासोमान् ॥[४]

१२७. सूपस्थाऽ अद्द्य देवो व्वनस्पतिरभवदिन्द्राय व्वयोधसेच्छागेन॥[५]

१२८. अघत्तम्मेदस्तः प्रति पचताग्रभीदवीवृधत्तपुरोडाशेन॥[६]

१२९. अघत्तम्मेदस्तः प्रति पचताग्रभीदवीवृधत्तपुरोडाशेन॥[७]

१३०. त्वामद्द्यऽ ऋषे॥[८]

---

१. वा.सं.२१.५९
२. वा.सं.२८.४६
३. वा.सं.२८.२३
४. वा.सं.२१.६०
५. वा.सं.२८.४६
६. वा.सं.२८.२३
७. वा.सं.२८.४६
८. वा.सं.२८.२३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३१. त्वामद्द्यऽ ऋषऽ आर्षेयऽ ऋषीणान्नपादवृणीतायँव्यजमानो बहुब्भ्यऽ आ सङ्गतेब्भ्यऽ एष मे देवेषु व्वसु व्वार्य्यायक्ष्यतऽ इति ता या देवा दैव दानान्न्यदुस्तान्न्यस्म्माऽ आ च शास्स्वा च गुरस्वेषितश्च्च होतरसि भद्द्रवाच्च्यायप्रेषितो मानुषः सूक्तवाकाय सूक्ताब्ब्रूहि॥[1]

१३२. त्वामद्द्यऽ ऋषे॥[2]

इत्येकादशतन्तुग्रथिता शृङ्खला

---

१. वा.सं.२१.६१
२. वा.सं.२८.४६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदानुक्रमणिका

।।श्रीगणेशाय नमः।। अथ पदानुक्रमणिकाप्रारम्भः।। हरिॐ।। इषेत्वा शतधारꣳसहस्रधारꣳ साव्विश्वायुः कस्त्वा प्रत्युष्टꣳरक्षो धूरसि धृष्टिरसि धिषणासि धान्यमसि संव्वपामि जनयत्यैत्वा माभेः पृथिविदेवयजन्यपाररुं गायत्रेणत्वा देवयजनमसि शेषाः षोडश[1] (कण्डिकाः) ।।अध्यायः।।१।। मं.।।१५।। ऋचः[2]।।३१।। पदसंख्या।।६१४।।

कृष्णोसि व्वीतिहोत्रन्त्वा घृताच्यस्यग्नेव्वाजजिदग्नेव्वेरुपहूतोद्यौरैतन्ते व्वसुभ्यस्त्वा सꣳस्त्रवभागास्थ घृताचीस्थो व्वेदोसि संव्वर्चसा स्वयंभूरस्यग्नेगृहपते[3] येरूपाण्याधत्तोर्जव्वहंतीर्मेपितृन्।। शेषाः[4]।।१६ (कण्डिकाः)।।अ. ।।२।।मं.।।१७।।ऋचः।।३३।। सं।।६६८।।

---

१. "शेशशोडशः" इति मूले

२. अत्र मंत्रशब्देन ऋचाशब्देन च कण्डिका बोद्धव्याः। लेखकेन कृतो मंत्रर्क्शब्दयोः प्रयोगो न युज्यते। मंत्रशब्देन ग्रन्थोक्तप्रतीकानामृक्शब्देन चाध्यायान्तर्गतानां समग्रकण्डिकानामवबोधनं लेखकोभिप्रैतीति समन्वयोस्माभिः कर्तुं शक्यते।

३. "गृपते" इति मूले

४. "शेशं" इति सर्वत्राध्यायान्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समिधाग्निꣳ सुसमिद्धायशोचिषऽ उप[1]त्वा भूर्भुवोग्नि-ज्योतिरग्निर्मूर्द्धोभावामस्यप्रत्नान्तनूपाऽअग्ने सन्त्वꣳ राजन्त-मध्वराणाꣳ[2] सनोग्नेत्वꣳ सोमानꣳस्वरणं त्वोरेवान्मानो नहितेषां तेहि कदाचन स्वःसुप्रजाऽ आगन्म गृहामोपहूताऽइह प्रघासिनोहवामहे मोष्वक्रन्कर्म पूर्णादर्वि देहिमऽ आनः पुनर्नो वयꣳसोमावरुद्रं भेषजमसि त्र्यंबकंत्वजामहे[3] त्र्यायुषं[4] जमदग्नेः सुप्रजास्त्वायसुवीर्याय॥शेषाः॥२९ (कण्डिकाः)॥अध्या०॥३॥ मंत्रः॥३३॥ऋ०॥६२॥संख्या॥८५६॥

एदमापोऽअस्मान्वृत्रस्यासि चित्पतिर्मावो विश्वोदेवस्योर्गसि व्रतङ्कृणुत श्वात्राःपीतास्त्वमग्नऽ एषाते चिन्मनानुत्वा समख्यऽ एषते परिमा प्रतिपन्थामदित्यास्त्वग्वनेषुव्वि सूर्यस्यचक्षुरुस्त्रावेतं भद्रोमे नमोमित्रस्य[5] व्वरुणस्योत्तंभनꣳ सोमदुर्य्यान्॥शेषाः ॥१३(कण्डिकाः)॥अ.॥४॥मं.॥२४॥ऋ.॥३७॥संख्या॥७४२॥

अग्नेस्तनूरग्नेर्जनित्रमग्नावग्निरापतयेत्वाꣳशुरꣳशुष्टे[6] तप्तायनीमे सिꣳहस्यस्येन्द्रघोषस्त्वा द्वितीयासिꣳहस्यसि[7]

---

१. "शोचिषेऽउप" इति मू०
२. "मध्वराꣳ" इति मू०
३. "जजामहे" इति मू०
४. "त्र्यायुखं" इति मू०
५. "नमोमे" इति मू०
६. "त्वाꣳशुष्टे" इति मू०
७. "सिꣳहस्यसिस्वाहा" इत्यर्थः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युंजतेमनऽ इदंविष्णुरिरावतीधेनुमती देवश्रुतौदेवेषु दिवोवा रक्षोहणन्द्वे[1] रक्षोहणोद्वे[2] इन्द्रस्यस्यूर्विभूरस्युशिक्कविर्ज्योतिरस्ययन्नो देवसवितरत्यन्यान्वयꣳरुहेम।।शेषाः।।१८(कण्डिकाः) ।।अध्या०।।५।।मं. ।।२३।।ऋ०।।४१।।संख्या।।८०६।।

अग्रेणीर्द्वे[3] याते तद्विष्णोः परिवीरस्युपावीरसि घृतेनाक्तौ माहिरिदमापः सन्ते घृतंघृतपावानो मापो हविष्मतीरिमाऽ अग्नेर्वो देवीरापः कार्षिरसि यमग्ने मनोमऽ इन्द्रायत्वा यत्तऽ ऊर्जंधत्स्व प्रागपाक्त्वेव्वचः शेषाः।।१४(कण्डिकाः)।।अ.।।६।।मं.।।२१।। ऋ.।।३५।।सं.।।६५८।।[4]

वाचस्पतये मधुमतीर्नऽ इंद्रवायूऽइमे यावाꣳ सुवीरोव्वीरान्नच्छिन्नस्यते सप्रथमोयंवेनो[5] मनोन सुप्रजाःप्रजा येदेवासऽ आग्रयणोसि मित्रावरुणाभ्यामिन्द्राय मूर्द्धानंदिवो ध्रुवोसि यत्तऽ आत्मनऽओजसे[6] कोसि मधवेत्वाघौमासश्चर्षणीधृतः[7] शृणुतामे मरुत्वाँइंद्रोदु रूपेणवः कोदादेतत्ते।। शेषाः।।१९ (कण्डिकाः)।।अध्या०।।७।।मं.।।२६।।ऋ०।।४५।।७८८।।

---

१. "रक्षोहणꣳरक्षोहनम्" इत्यर्थः

२. "रक्षोहणोरक्षोहनः" इत्यर्थः

३. "अग्रेणीरग्रेनीः' इत्यर्थः।

४. इतः परं पदसंख्या मूलपुस्तके नोल्लिखिता, अतः अस्माभिरेव निर्दिश्यते।

५. "सप्रथमरयंवेनो" इति मू०

६. अत्र आत्मनऽओजसे" इत्यस्य कण्डिकात्वेन पृथग्गणना कृता लेखकेन। गलदृक्शिक्षायाम् "आत्मने सम्पृक्ते" इत्युक्तम्।

७. "घोमासश्चऋषणीधृतः इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदित्येभ्यस्त्वा कदाचन व्वाममद्य हरिरसि यस्ते देवकृतस्यैनसो धातारातिर्व्वयꣳहयुरुꣳहयग्नेरनीकꣳ समुद्रेते पुरुदस्मोव्विषुरूपऽ आतिष्ठ यक्ष्वाहयग्नेपवस्वादृश्रमस्येडेरंते व्विनो व्विश्वकर्मन्हविषोशिगिहि सत्रस्यऽऋद्धिर्युवंतं परमेष्ठीद्वे[१]ऽ इंद्रश्च प्रोहयमाणोद्वे[२] विश्वेदेवाद्वितीया[३] देवान्दिवं चतुस्त्रिꣳशत्तन्तवो यज्ञस्यदोहऽ आपवस्व स्वाहा।। विषमोध्यायः[४]।।शेषाः।। २७ (कण्डिकाः)।।अध्या०।।८।। मंत्रः।।३०।।ऋ०।।५७।। संख्या।।१०१९।।

देवसवितरपाꣳरसं ग्रहाऽऊर्ज्जाहुतयो व्वातोवा देवस्याहं बृहस्पतेव्वाजमेषावऽ एषस्य[५] व्वाजेवाजेवतामापयेस्वाहा व्वाजस्येमꣳ सरस्वत्यैव्वाचो व्वसवस्त्रयोदशाक्षरेण यदेवाऽ उपाꣳशोर्व्वीर्येण ब्राह्मणानाꣳराजा।।शेषाः।।२३(कण्डिकाः)।। अध्या०।।९।।मं.।।१६।।ऋ०।।३९।।संख्या।।७२८।।

अपोदेवा वृष्णऽऊर्मिरर्थेतस्थ सोमस्यत्विषिरनिभृष्टमसि सधमादोद्युम्निनीः[६] प्रतीचीमोदीचीमा सोमस्यत्वा मित्रावरुणयोस्त्वा

---

१. "परमेष्ठीपरमेस्थी" इत्यर्थः

२. "प्रोहयमाणःप्रोहयमानः" इत्यर्थः

३. "विश्वेदेवाश्चमसेषु" इत्यर्थः

४. अस्मिन्नध्याये पदसंख्याया विषमत्वम्, अध्यायविशम् इति मू०

५. "एषस्यो" इति मू०

६. "द्युम्निनीप्रतीचीमो" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मातेग्नयेगृहपतयऽ इयदसि स्योनास्यग्निःपृथुर्मघवन्नभिष्णाक्।। शेषाः।।१७ (कण्डिकाः)।।अ.।।१०।।मं.।।१५।।ऋ.।।३२।।सं.।।५७८।।

युञ्जानःप्रथमँयस्य[१]प्रयाणमाददेभ्रिरसि हस्तऽआधाय प्रतूर्तंव्वाजिन्युंजाथाꣳरासभं[२] प्रतूर्वन्नाक्रम्यव्वाजिन्नुत्क्रामोदक्रमीत्परिवाजपतिस्त्वमग्नेपांपृष्ठꣳ संव्वसाथां पुरीष्योसि तमुद्वितीया[३] सीदहोतः सन्ते सुजातोज्योतिषोदुस्थिरोभवऽ ऋतꣳसत्यमोषधयः-प्रत्यापोहि मित्रःसꣳसृज्य रुद्राःसꣳसृज्य सꣳसृष्टांव्वसुभिः सिनीवालीसुकपर्दोखांकृणोतु व्वसवस्त्वादितिष्टेदितिष्ट्वा[४] मित्रस्यचर्षणीधृतो देवस्त्वोत्थायबृहत्याकूतिमग्निं मासु दृꣳहस्वदेविद्वन्नःसर्पिरासुतिः परस्याऽअधि परमस्याःपरावतो यदग्ने नाभापृथिव्या याःसेनाऽ उदेषां चतुष्पदेद्वे[५] शेषाः।।३२(कण्डिकाः) ।।अ.।।११।।मं. ।।४६।।ऋ.।।७८।।सं.।।११७८।।

दृशानोरुक्मो नक्तोषासाद्वे[६]ऽ अक्रन्ददग्नि[७]रग्नेभ्यावर्तिन्नग्नेऽअङ्गिरः पुनरूर्जा[८] सहरय्यात्वाग्रेबृहन्नंतरग्ने शिवोभूत्वा

---

१. "युयानःप्रथमञ्यस्य" इति मू०

२. "रासभन्" इति मू०

३. "तमुत्वापाथ्यः" इत्यर्थः

४. "व्वसवस्त्वादितिष्ट्वा" इति मू०

५. "चतुष्पदेचतुःपदे" इत्यर्थः

६. "नक्तोषासानक्तोषसा" इत्यर्थः

७. "द्वेक्रन्ददग्निर" इति मू०

८. "पुनऽऊर्जा" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समुद्रेत्वा व्विश्वस्यकेतुरुशिक्पावको यस्ते त्वामग्नेस्ताव्यग्निः प्रेत्पुनस्त्वाग्नेयदग्नेदिवऽ इडामग्ने ताऽअस्य संव्वामग्नेत्वम्मातेवपुत्रमसुन्वन्तमयजमानं यस्यास्ते यंते कामङ्कामदुघे शतंवऽ ओषधीरित्यश्वत्थेवो यत्रौषधीरिष्कृतिर्नामातिविश्वा यस्यौषधीः साकँयक्ष्मान्यावो याःफलिनीर्मुंचंतुमा विष्ठिताःपृथिवीँ[१] याश्च त्वाङ्गन्धर्वा दीर्घायुस्ते त्वमुत्तमा मामाभ्याग्नेयदग्नेतवेष्कर्तारमध्वरस्यऽ ऋतावानंद्वेऽ[२] आप्यायस्वाप्यायस्वद्वितीया[३] तुभ्यंता राजति॥ विषमोध्यायः[४]॥शेषाः॥ ५४(कण्डिकाः)॥अ.॥१२॥मं.॥५४॥ऋ.॥१०८॥सं.॥१६७३॥

मयिगृह्णामि ब्रह्मजज्ञानꣳ[५] हिरण्यगर्भःसन्नमोस्तु येवा प्रतिस्पशऽ[६] उदग्ने भुवोयज्ञस्य ध्रुवासि मधुश्चाषाढासि मधुव्वातास्त्रीन्त्समुद्रानितोजज्ञऽ[७] इषेरायेग्ने[८]युक्ष्वऽ ऋचेत्वा व्वातस्यजूतिं वरूत्रीन्त्वष्टुर्योऽअग्निः साहस्रꣳशतधारमजोहि[९]

---

१. "याऽओषधीःर्याश्च" इति मू०

२. "ऋतावानमृतवानम्" इत्यर्थः

३. "आप्यायस्वमदिन्तम" इत्यर्थः

४. अस्मिन्नध्याये पदसंख्याया विषमत्वम्। "विश" इति मू०

५. "ब्रह्मयज्ञाꣳ" इति मू०

६. "प्रतिस्पशः" इति मू०

७. "यज्ञऽ" इति मू०

८. "रायेऽअग्ने" इति मू०

९. "शतधारजोहि" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वंवविष्ठ[1] दक्षिणाव्विश्वकर्मा पश्चाद्विश्वव्यचाऽ इदमुत्तरात्ताऽइन्द्रम् ।।शेषाः।।२७(कण्डिकाः)।।अ.।।१३।।मं.।।२६।।ऋ.।।५३।।सं.।।८७४।।

ध्रुवक्षितिर्ध्रुवयोनिः कुलायिनीघृतवती स्वैर्दक्षैः पृथिव्याःपुरीषमदित्यास्त्वा सजूर्ऋतुभिः प्राणम्मे मूर्द्धाव्वयो राज्ञस्यायुर्मे माच्छन्दोग्नेर्भागो व्वसूनाꣳरुद्राणान्नवभिःपितरो नवविꣳशत्याव्वनस्पतयः परमेस्थी।। विषमोध्यायः[2]।।शेषाः।। १०(कण्डिकाः)।।अ.।।१४।।मं.।।१५।।ऋ.।।२५।।सं.।।४६५।।

अग्नेजातान्सहसाजातान्षोडशीस्तोमऽ आच्छत्रच्छत्तन्तु-नारायः प्रतिपदसि त्रिवृत्त्रिवृते व्विराड्दक्षिणा[3] स्वराडुदीच्यधि-पत्न्यस्ययंपुरो दक्षिणाव्विश्वकर्मा पश्चाद्विश्वव्यचाऽ उत्तरात्सँवद्वसु[4] रुपर्यर्व्वाग्वसुरबोध्यग्निरवोचामकवये सखायःसं त्वाञ्चित्रश्रवस्तम[5] सयोजतेग्नेव्वाजस्य भद्रोनो भद्रम्मनोवस्थिराग्निंतमुभेसुश्चंद्रा-ग्नेतमेभि[6]-र्नस्तंपत्नीभिः संप्रच्यवध्वमुप प्रोथदश्वऽ आयोष्ट्वा त्वा।। विषमोध्यायः[7] ।।शेषाः।।२२(कण्डिकाः)।।अ.।।१५।।मं.।। ३१।।ऋ. ।।५३।। सं. ।।८३३।।

---

१. "त्वंजविष्ठ" इति मू०

२. "विशम्" इति मू०

३. "विराट्दक्षिणा" इति मू०

४. "सजद्वसुरुप....." इति मू०

५. "त्वाँचित्रश्रवस्तम" इति मू०

६. "सुश्चंद्राग्नेमेभिर्न....." इति मू०

७. अस्मिन्नध्याये पदसंख्याया विषमत्वम् "विशम्" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्ते ऋाते ऋामिषुः शिवेनव्वचसाध्यवोचदसौऋो नमोस्तु ऋाते परितेवतत्यधनुर्नमस्ते मानो बभ्लुशायव्याधिने रोहितायस्थपतयऽ[१] उष्णीषिणेगिरिचराय श्वभ्यःश्वपतिभ्यः कपर्दिनेव्युप्तकेशाय बिल्मिनेकवचिने धृष्णवेप्रमृशाय स्रुत्यायपथ्याय कूप्यायावट्याय व्वात्यायरेष्म्याय शङ्गवेपशुपतये पार्ऋायावार्ऋाय सिकत्यायप्रवाह्ऋाय व्रज्यायगोष्ठ्याय शुष्क्यायहरित्याय पर्णायपर्णशदायेमारुद्राय परिनो मीढुष्टमद्वे[२] सहस्राणिसहस्रशोस्मिन्महति[३] नीलग्रीवाःशितिकंठा व्वृक्षेषुशष्पिंजरा भूतानामधिपतयः पथांपथिरक्षयस्तीर्थानि-प्रचरंत्यन्नेषुव्विविध्यंति नमोस्त्वन्नम्।। विषमोध्यायः[४]।। शेषाः।।२३(कण्डिकाः)।।अ.।।१६।।मं.।।४०।।ऋ.।।६३।।सं. ।।७०३।।

अश्मन्नूर्जः समुद्रस्यत्वापामिदमग्नेपावक नमस्ते नृषदेद्वे[५] ऋेदेवाद्वितीया[६] प्राणदाऽअपानदा ऋऽइमा[७] व्विश्वतश्चक्षुरुत किꣳस्विद्याते[८] ऋोनस्तऽआ परोदिवा तमित्सऽइषुहस्तैर्बृहस्पतेपरि

---

१. "स्थपतयेऽउष्णीषिणे" इति मू०

२. "मीढुष्टममीढुस्तम" इत्यर्थः

३. "सहस्रशरस्मिन्महति" इति मू०

४. अस्मिन्नध्याये पदानां संख्या विषमास्ति। "विशम्" इति मू०

५. "नृषदेनृसदे" इत्यर्थः

६. "ऋेदेवाः" इति मू०

७. "ऋेऽइमा" इति मू०

८. "किꣳस्वित्ऋाते" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बलविज्ञायस्थविरो गोत्रभिदंगोविदमभिगोत्राणीन्द्रऽआसामुद्धर्षया-वसृष्टापरासौया मर्माणितऽ उदेनꣳ समिद्धेऽअग्नौ सूर्यरश्मिर्हरिकेशो देवहूर्यज्ञऽ उद्ग्राभंच क्रमध्वमग्निना स्वर्यतोग्नेप्राग्नेसहस्राक्षाजुह्वानःसुप्रतीकः प्रेद्धोऽअग्ने सप्ततऽ ऋतःसत्यः स्वतवान्प्रघासी घृतम्मिमिक्षे समुद्रादूर्मिश्चत्वारिशृङ्गाऽ एताऽअर्षन्त्येतेऽअर्षंत्यभिप्रवन्त धामन्तऽ ऊर्मिम्॥ विषमोध्यायः[१]॥ शेषाः॥४५(कण्डिकाः)॥ अ.॥१७॥मं.॥४७॥ ऋ.॥९२॥सं.॥१४६५॥

व्वाजश्च प्राणोपानऽ ओजःसहो ज्यैष्ठ्यमाधिपत्यꣳ सत्यꣳश्रद्धऽ ऋतममृतं यन्ताधर्ता शंमयऽ ऊर्क्सूनृता रयीरायो व्वित्तंवेद्यं व्रीहयोयवाऽ अश्मामृत्तिकाग्निरापो मित्रोव्वरुणः स्रुचश्चमसा व्रतमृतवश्चतस्रोष्टौ त्र्यविस्त्र्यवी[२] पष्ठवाट्पष्ठौही व्वाजायस्वाहा वाङ्मनो व्विश्वेऽअद्य[३] व्वाजोनो व्वाजोनः पयःपृथिव्याꣳ सुषुम्णोद्वे[४] इषिरोव्विश्वव्यचाः प्रजापतिर्विश्वकर्मा समुद्रोसि तत्त्वा स्वर्णाग्निंयुनज्मींदुर्दक्षो दिवोमूर्धेष्टोऽअग्निः प्रस्तरेणपरिधिना यद्दत्तं[५] यत्रधाराऽ ऋचोयजूꣳषि[६] सहदानुंपुरुहूत

---

१. अस्मिन्नध्याये पदानां संख्या विषमास्ति। "विशम्" इति मू०

२. "त्र्यवित्र्यवी" इति मू०

३. "विश्वेअद्य" इति मू०

४. "सुषुम्णःसुसुम्नः" इत्यर्थः

५. "यदत्तं" इति मू०

६. "ऋचो यजुꣳषि" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परावतऽआश्यामतं धामच्छदग्निर्नःशुभे।।शेषाः।।२५(कण्डिकाः)[१] ।।अ.।।१८।।मं.[२] ।।४४।।ऋ.।।६९।।सं.[३]।।९००।।

स्वाद्वींत्वा परीतः पुनातितऽ आश्विनंतेजस्तेजोसि सोमस्यरूपमासंदीरूपं धानानाꣳरूपमाश्रावयाश्विभ्यांप्रातःसवनं व्वायव्यैर्व्वायव्यानि व्रतेनदीक्षामेतावद्रूपꣳ सुरावंतंबर्हिषदं यस्ते यदत्र पितृभ्यःस्वधायिभ्यः पवमानःसो व्वैश्वदेवीपुनतीदꣳहविरंगिर-सोनो बर्हिषदोद्वे[४]ऽ आयंत्वग्निष्वात्ताद्वेऽ[५] आसीनासोऽअरुणीनां येचाधायथोशन्तस्त्वापांफेनेनाद्भ्यःक्षीरं दृष्ट्वारूपे सीसेनतंत्रꣳ सरस्वतीमनसेन्द्रःसुत्रामान्त्राणिस्थालीर[६]विर्नेन्द्रस्यरूपमात्मन्नुपस्थे सोमऽइंदुः।।शेषाः।।५५[७](कण्डिकाः)।।अ.।।१९।।मं.।।३८[८]।।ऋ.।।९३[९] ।।सं.।।१३७६।।

क्षत्रस्ययोनिरश्विनोर्भैषज्येन शिरोमे नाभिर्मे प्रतिक्षत्रे प्रथमाद्वितीयैर्यद्देवा द्रुपदादिवमुमुचानऽ उद्वयं यत्रब्रह्माꣳशुनाते

---

१. लेखकेन अवशिष्टानां कण्डिकाप्रतीकानां गणना न कृता।

२. लेखकेन संकलितानां कण्डिकोक्तप्रतीकानां गणना न कृता।

३. लेखकेन अस्याध्यायस्य कण्डिकोक्तप्रतीकानां गणना न कृता।

४. बर्हिषदोबर्हिसदः'' इत्यर्थः

५. ''अग्निष्वात्ताऽअग्निस्वात्ताः'' इत्यर्थः

६. ''सुत्रामाविर्नेन्द्रस्य'' इति मू०

७. लेखकेनावशिष्टानां कण्डिकानाप्रतीकानां गणना न कृता।

८. लेखकेन संकलितानां कण्डिकोक्तप्रतीकानां गणना न कृता।

९. मूलेत्राप्यस्याध्यायस्य कण्डिकोक्तप्रतीकानां गणना न दृश्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धानावंतंकरम्भिणं बृहदिंद्राय प्राणपामेश्विनकृतस्यते नराशꣳसः-
प्रतीडितोदेवैर्जुषाणोबर्हिरिंद्रंदुरस्त्वष्टादधद्वनस्पतिरवसृष्टऽ आनो
हरिभिर्यातु त्रातारमिन्द्रमेवेत्समिद्धोऽअग्निस्तनूपाभिषजेन्द्रायेन्दु-
मश्विनानमुचेः पातन्नस्तिस्रस्त्रेधऽ ऋतुथेन्द्रोश्विना[१] हविस्तमिन्द्रꣳ[२]
सविताव्वरुणो व्वरुणःक्षत्रमश्विनागोभिस्ताभिषजाश्विनातेजसा गोमदू
पावकानश्चोदयित्रीसूनृतानाꣳ सोम्यम्मधु।।शेषाः।।३९ (कण्डिकाः)[३]
।।अ.।।२०।।मं.।।४२[४]।।ऋ.।।८१[५]।।सं.।।११६४।।

इमम्मे त्वन्नो महीमू सुत्रामाणंपृथिवीꣳ सुनावमा
समिद्धोऽअग्निस्तनूनपाच्छुचिव्रतः सुबर्हिरग्निर्दैव्याहोतारा
तिस्रऽइडा त्वष्टातुरीपः स्वाहायज्ञं व्वसन्तेनऽऋतुना ग्रीष्मेणरुद्रा
व्वर्षाभिरादित्याः शैशिरेणत्रयस्त्रिꣳशे होतायक्षदिडेडितो दुरोदिंशो
दैव्याहोतारा व्वनस्पतिꣳशमितारमग्निꣳस्वाहाश्विनौच्छागस्या[६]-
श्विनौच्छागस्याग्निꣳस्विष्टकृतं देवंबर्हिर्देवीऽउषासौ देवीजोष्ट्री

---

१. "ऋतुथेन्द्ररश्विनाहवि....." इति मू०
२. "तमिन्द्रः" इति मू०
३. अवशिष्टानां कण्डिकाप्रतीकानां गणना मूले न दृश्यते। अग्रिमेष्वध्यायेष्वेवमेव गणना नास्ति।
४. संकलितानां कण्डिकाप्रतीकानां गणना मूले न दृश्यते। अतः परमध्यायान्ते गणना न दृश्यते।
५. अस्याध्यास्य कण्डिकोक्तप्रतीकानां गणना मूले न दृश्यते। एवमेवाग्रिमेष्वध्यायेष्वपि गणना नास्ति।
६. "अश्विनौच्छागस्यसरस्वतीम्" इत्यर्थः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवीस्तिस्रो देवऽइंद्रः सूपस्थाऽअद्य ब्रूहि।। विषमोध्यायः[१] ।।शेषाः।। २६(कण्डिकाः)।।अ.।।२१।।मं.।।३१।।ऋ.।।५७।।सं.।।९४३।।

तेजोसि प्रजापतयेत्वापाम्मोदाय यतेधावते देवस्यचेततः सुष्टुतिंद्वे[२] सहव्यवाडग्निंदूतं कायकस्माऽ आब्रह्मँश्चक्षुषेश्रोत्राय प्राच्यैदिशे नक्षत्रेभ्योनक्षत्रियेभ्यः प्राणोपानः स्वर्गाय।। विषमोध्यायः[३]।। शेषाः।। १५(कण्डिकाः)।।अ.।।२२।।मं.।।१४।। ऋ.।।२९।।सं.।।४४१।।

प्रजापतयेत्वा युंजंतिब्रध्नं यद्वातो व्वसवस्त्वा सूर्यऽएकाकी कास्विद्वायुष्ट्वा सद्दशितोरश्मिना नवै यकासकावग्रेवृक्षस्योर्ध्वामेनामूर्ध्वमेनं यदस्या यद्देवासो यद्धरिणो बहुमन्यते दधिक्राव्णोऽअकारिषमृतवस्तेर्द्धमासाःपरूंषि दैव्याऽअध्वर्यवो द्यौस्ते किंस्विदपितेषु केष्वंतः पंचस्वन्तः कत्यस्य व्वेदाहं पृच्छामित्वेयंव्वेदिर्होतायक्षद्धोतर्व्यज[४]।।शेषाः।। २६(कण्डिकाः) ।।मं.।।३१।।ऋ.।।५७।।सं.।।८४४।।

अश्वस्तूपरो रोहितोधूम्ररोहितः पृश्निस्तिरश्चीनपृश्निरुन्नतऽऋषभऽ एताऽऐन्द्राग्ना धूम्राबभ्रुनीकाशाः शुनासीरीयाःश्वेताऽ अह्नेपारावतान्भूम्याऽआखून्वसुभ्यऽऋश्यान्प्रजापतयेच मयुःप्राजापत्यः सोमायकुलुङ्गः सुपर्णःपार्जन्यः पुरुषमृगश्चन्द्रमसः श्वित्रऽआदित्यानां

---

१. अस्मिन्नध्याये पदानां संख्या विषमास्ति। "विशम्" इति मूले।
२. "सुष्टुतिद्वसुस्तुतिम्" इत्यर्थः
३. अस्मिन्नध्याये पदानां संख्या विषमा। "विशम्" इति मू०
४. "यव" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवानांपृषतः[1]॥शेषाः॥२४(कण्डिकाः)॥अ.॥२४॥मं.॥१६॥ ऋ.॥४०॥सं.॥६१४॥

शादंदद्भिर्व्वातंप्राणेनाग्नेः पक्षतिरिन्द्राग्न्योःपक्षतिर्मरुताꣳ-स्कंधाः पूषणंव्वनिष्ठुनेन्द्रस्यक्रोडो देवानांभद्रा तान्पूर्वया तमीशानं मानो यन्निर्णिजैषच्छागो यद्धविष्यः[2] होताध्वर्युर्यदश्वस्य यदूवध्यं येव्वाजिनं यन्नीक्षणं मात्वा निक्रमणन्निषदनं यत्ते चतुस्त्रिःश-द्वाजिनो मात्वेमानु सीषधातिद्वे[3]॥शेषाः॥१९ (कण्डिकाः) ॥अ.॥२५॥मं.॥२५॥ऋ.॥४४॥सं.॥९१२॥

अग्निश्च बृहस्पतेऽअत्येन्द्रगोमन्निन्द्रऽ ऋतावानंद्वे[4] तंवो यद्वाहिष्ठमेहयुपह्वरेगिरीणामुच्चातऽ एनाव्विश्वानि तवायममेवनः स्वादिष्ठयामदिष्ठया रक्षोहाव्विश्वचर्षणिरासदत्[5]। शेषाः॥१० (कण्डिकाः)॥अ.॥२६॥ मं.॥२५॥ऋ.॥१५॥सं.॥३५४॥

समास्त्वा संचातिनिहस्तनूनपादसुरो मध्वायज्ञमच्छायः सयक्षत्ते[6]ऽअस्य तन्नः पीवोऽअन्नारयिवृधो[7] रायेन्वापोह

---

१. "प्रेषितः॥ सम्॥" इति मू०

२. "यद्धविष्यो" इति मू०

३. "सीषधातिसीसधाति" इत्यर्थः। अतःपरं "सम्" इति मू०

४. "ऋतावानमृतवानम्" इत्यर्थः।

५. अतः परं "सम्" इति मू०

६. "सयक्षत्ते" इति मू०

७. "अन्नान्नरिवृधो" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यश्चिन्नियुत्वान्वायो व्वायोशुक्रो नत्वावाँस्त्वामित्कयानोभीषु[1] ध्रुवःसीद[2]।।शेषाः।।२५ (कण्डिकाः)।।अ.।।२७।।मं.।।१९।।ऋ. ।।४४।।सं.।।६५२।।

इंद्रमिडस्तनूनपातमूतिभिरोजोन भिषजासखाया धियोजोष्टारं देवंबर्हिरिन्द्रꣳसङ्घाते व्वसुधितीदेवं मधुशाखःसुपिप्पलः स्विष्टङ्कुर्व्वन्त्समिधानम्महदीडेन्यमीडितꣳ सुबर्हिषंपूषण्वन्तꣳ हिरण्यपर्णमुक्थिनं देवंबर्हिश्च्छागेन[3]।।शेषाः।।२१(कण्डिकाः) ।।अ.।।२८।।मं.।।१५।।ऋ.।।३६।।सं.।।४२७।।

समिद्धोऽअञ्जन्नीड्यश्चैताऽउ त्वष्टावीरँ यदक्रंदो यमेनदत्त-मसियमस्त्रीणितऽ इमातेनुत्वेर्मांतासःसिलिकमध्यमासस्तवशरीरꣳ शसनँव्वाजी परमंयत्समिद्धोऽअद्य तनूनपात्पथो नराशꣳसस्य-महिमानं प्राचीनम्बर्हिरानः सद्योजातः केतुंकृण्वन्धन्वनागा बह्वीनांपिता रथेतिष्ठन्ब्राह्मणासःपितरः सुपर्णव्वस्तऽ आजङ्घंत्यहिरिवभोगैर्दिवःपृथिव्याऽ आक्रन्दयामूरष्टाकपालः[4]। शेषाः।।२९।।अ.।।३०।। मं.।।३१।।ऋ.।।६०।।सं. ।।१०७१।।

---

१. "त्वात्वमित्कयानोभिषु" इति मू०
२. "ध्रुवःसीदसम्" इति मू०
"सम्" इत्यस्यार्थो यदस्मिन्नध्याये पदानां संख्या समास्ति।
३. "छागेनविशम्" इति मू०, "विशम्" इत्यनेन "विषमोध्यायः" इति ज्ञातव्यः।
४. "रष्टाकपालः" "विशम्" इति मू०, "विशम्" इत्यनेन "विषमोध्याय इति ज्ञातव्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्विश्वानिदेव व्विभक्तारꣳहवामहे नृत्तायसूतं नदीभ्यःपौञ्जिष्ठमृतयेस्तेनहृदयं मन्यवेयस्तापं यमाययमसूꣳ सरोभ्योधैवरं बीभत्सायैपौल्कसं प्रतिश्रुत्कायाऽअर्तनमग्नयेपी-वानमथैतान्क्लीबः[१]।।शेषाः[२]।।८ ।।अ.।।३०।।मं.।।१२।।ऋ. ।।२०।।सं. ।।४११।।

सहस्रशीर्षापुरुषऽ एतावानस्य त्रिपादूर्ध्वस्ततोव्विराडृ-चःसामानि तंयज्ञं ब्राह्मणोस्य यज्ञेनयज्ञमद्भ्यःसंभृतः प्रजापतिश्चरति योदेवेभ्यऽ इषाण[३]।। शेषाः।।११।।अ.।।३१।। मं.।।११।। ऋ.।।२२।।सं.।।३३५।।

तदेव नतस्यैषोह[४] यस्माज्जातं[५] यंक्रंदसी सनः परिद्यावापृथिवी सदसस्पतिं यांमेधां मेधाम्मे तेस्वाहा[६]।।शेषाः।। ६।।अ.।।३२।।मं. ।।१०।।ऋ.।।१६।।सं.।।२६२।।

अस्याजरासो द्वेव्विरूपे त्रीणिशतायदग्नेशर्द्ध[७] श्रुधिश्रुत्कर्ण व्विश्वेषामदितिरापश्चिदातिष्ठंतंपरि बृहन्निदिंद्रेंद्रोवृत्रमिमांते

---

१. "क्लीबःविशम" इति मू०, "विशम्" इति पूर्ववज्ज्ञेयः।
२. "शे" इति मू०
३. "इषाणविशम्" इति मू०, "विशम्" इति पूर्ववज्ज्ञेयः।
४. "नतस्येषोह" इति मू०
५. "यस्माज्यातो" इति मू०
६. "स्वाहासम्" इति मू०, "सम्" इति पूर्ववज्ज्ञेयः।
७. "शतायदग्ने" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दैव्यावध्वर्य्यूऽ[1] आनो यदद्य बण्महानिंद्रवायूबृहस्पति-मधिनोस्मेरुद्राऽ अर्व्वाञ्चोऽअद्य[2] व्विश्वेदेवाः प्रवायुं व्विदद्यद्युग्राव्विघनिना येत्वा जनिष्ठाऽउग्रः प्रवीरयोपनो[3] ब्रह्माणिमऽ इमाऽउऽ अयꣳ[4]सहस्रमिंद्रवायूसुसन्दृशऽ[5] ऋधगित्थायातं[6] प्रैतु चंद्रमाऽअप्सु देवंदेवंवऽ इन्द्राग्नीऽअपाद् देवासोह्यपाधमत्प्रवः पूर्वथा[7]॥शे.॥४५॥अ.॥३३॥मं.॥४२॥ ऋ.॥८७॥ सं.॥१३०५॥

यज्जाग्रतो[8] येनकर्माणि पितुन्वनुनस्त्वमग्ने प्रमन्महे प्रवऽ इच्छंतित्वा नते सोमोधेनुः हिरण्यपाणिःसवितापनस्वतीमश्विना[9] प्रातरग्निमुतेदानीꣳ समध्वरायाश्वावतीर्द्वे[10] पूषन्तव पथस्पथोद्वेऽ[11] आनासत्यायुष्यंव्वर्चस्यं यदोतनऽ[12] इमागिरऽ उत्तिष्ठ प्रनूनꣳ

---

१. "दैव्यावध्वर्य्यानो" इति मू०
२. 'आर्व्वाचो" इति मू०
३. "प्रवीरयाशुचयऽउपनो" इति मू०
४. "उ अयꣳ" इति मू०
५. "सुसन्दृशा ऋ" इति मू०
६. "ऋधगित्थायातं" इति मू०
७. "पूर्वथाविशं" इति मू०, "विशं" इति पूर्ववज्ज्ञेयः।
८. "यज्जाग्रतो" इति मू०
९. "सवितरप्नस्वतीमश्विना" इति मू०
१०. "अश्वावतीरश्ववतीः" इत्यर्थः
११. "पथस्पथःपथःपथः" इत्यर्थः
१२. "यद्वोतन्नऽ" इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुवीराः[1]॥शे.॥३२॥अ. ॥३४॥मं.॥२५॥ऋ.॥५७॥सं. ॥९३३॥

अपेतः सविताते सवितातऽ[2]इमंजीवेभ्यो व्वहव्वपाꣳ स्योनापृथिव्यस्मात्त्वꣳस्वाहा[3]॥ शेषाः॥११॥मं.॥७॥ऋ.॥१८॥ सं.॥२७३॥

ऋचंवाचं यन्मे मित्रोव्वरुणो व्वातःपवतां द्यौःशान्तिर्नमस्ते यतोयतःसमीहसे चशतात्[4]॥ शे.॥६॥अ.॥३६॥मं.॥७॥ऋ. ॥१३॥सं.॥१७२॥

नारिरसि देव्व्योव्वम्र्यो यमायमखाय स्वाहामरुद्भिर्गर्भो-देवानामपश्यङ्गोपां व्विश्वासांभुवाꣳ स्वाहारात्रिः[5]॥ शे.॥६॥ अ.॥३७॥मं.॥७॥ऋ.॥१३॥ सं.॥१९८॥

सरस्वत्यसावश्विभ्यांपिन्वस्व यस्ते गायत्रंछन्दो व्विशाऽआशा दिविधाऽ अश्विनाघर्म्ममपातामश्विना याते क्षत्रस्यत्वाचिक्रदद्वृषा यावतीद्यावापृथिव्युपहूतस्यभक्षयामि[6]॥शे.॥ १०॥अ.॥३८॥मं.॥१२॥ऋ.॥२२॥ सं.॥३०४॥

---

१. "सुवीराःविशं" इति मू० "विशं" इति पूर्ववत्।
२. सविताते द्वितीया (सवितातेशरीराणि) इत्यर्थः।
३. "स्वाहाविशम्" इति मू०, "विशम्" इति पूर्ववत्।
४. "चशतात् सम्" इति मू०, "सम्" इति पूर्ववत्।
५. "स्वाहारात्रिः सम्" इति मू०, "सम्" इति पूर्ववत्।
६. "भक्षयामिसम्" इति मू०, "सम्" इति पूर्ववत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहाप्राणेभ्यो व्वाचेप्राणाय मनसःकामꣳ सविताप्रथमऽ उग्रश्च लोमभ्यस्त्वचऽ आयासायप्रायासाय तपसेतप्यते द्यावापृथिवीभ्याम्।।विशम्[1]।।शे.।।५।।अ.।।३९।।मं.।।८।।ऋ.।।१३।। सं.।।१७९।।

ईशाव्वास्यमसुर्य्यानामान्धन्तमोविद्याँ[2]व्विद्यायांव्वायुरनिलꣳ हिरण्मयेनपात्रेण ब्रह्म[3]।।शे.।।९।।अ.।।४०।।मं. ।।५।।ऋ.।।१४।। सं.।।२११।।

।।इतिपदानुक्रमणिका[4]।।

(रामचन्द्रबालमुकुन्दभटवाशिंकरलिखिता)

---

१. "विशम्" इति पूर्ववत्।
२. "तमोव्विद्याम्विद्यायां" इति मू०
३. "ब्रह्मविशम्" इति मू०, "विशम्" इति पूर्ववत्।
४. ।।इतिपदमंत्राणुक्रमणिकासमाप्तः। ।।हस्ताक्षररामचंद्रबालमुकुन्दभटवाशिंकरदंडे।। ।।सं.।।१९७५ जेष्ठ कृष्ण२ बुधवासरे ।।इति मू०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आचार्यगोपालचन्द्रमिश्रग्रन्थमालायां प्रकाशितग्रन्थाः

१. वेदशाखापर्यालोचनम्

२. मधुपर्कपर्यालोचनम्

३. मूल्याध्यायपरिशिष्टम् (भाष्यचतुष्टयसमन्वितम्)

४. कात्यायनीयच्छन्दःसूत्रम् (भाष्यद्वयसहितम्)

५. प्राचीनभारतीयसामाजिकधर्मः

६. याज्ञिकन्यायमाला सविस्तरा

७. कौशिकगृह्यसूत्रम् सवृत्तिकम् परिभाषाध्यायः

८. श्रुतिप्रयोगसंग्रहः

९. श्रीश्यामदेवोपासना

१०. वैदिक एवं पौराणिक विचारदर्शन

११. प्राचीन भारतीय एवं आधुनिक–संस्कृत–शिक्षण

१२. काव्यरूप में प्रतिफलित श्रीहर्ष का शास्त्रपाण्डित्य

१३. कात्ययनशुल्बसूत्रम् (सभाष्य)

१४. शौनकशिक्षा (सानुवाद)

१५. कौशिकसूत्रप्रयोगोद्योतः

१६. उपाकर्मपीयूषः

१७. संहितापदयोर्विशेषपाठदीपिका (माध्यन्दिनीया)

प्रकाशक :

आचार्यगोपालचन्द्रमिश्र

वैदिक उन्नयन संस्थान

सीके. ३२/१७, ब्रह्मनाल, वाराणसी २२१०२ उ० प्र०

संहितापादयोर्विशेषपाठदीपिका

ISBN–९७८–९३–८२८१२–०७–४

मूल्य - ₹१५०/-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection